# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ४ | |
|---|---|---|
| विषयः - साहित्यम् ( काव्यवर्गः ) | (C.F.-4.1.3. New ) | गुणाः - ७० |
| दिनाङ्कः - १८/१२/२०१८ | *ग्रन्थः वासवदत्ता (पूर्वार्धः) सुबन्धुविरचिता* | समयः -२.०० तः ०५.०० |

**प्रथमान्विति:**

**प्रश्नः १ निम्नलिखिताभ्यां एकस्य ससन्दर्भ व्याख्यां कुरुत ।** **( ५ )**

*(१) खिन्नोऽसि मुञ्च शैलं बिभ्रमो वयमिति वदत्सु शिथिलभुजः ।*
*भर भुग्नवितत बाहुषु गोपेषु हसन् हरिर्जयति ॥*

*(२) हस्त इव भूति मलिनो यथा यथा लङ्घयति खलस्सुजनम् ।*
*दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायाम् ॥*

**प्रश्नः २** *सुबन्धुकवेः जीवन-परिचयं लिखत।* **( १० )**

*(अथवा)*

*वासवदत्ता ग्रन्थस्य गद्यात्मकेन वैशिष्ट्यं वर्णयन्तु ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ एकस्य गद्यखण्डस्य ससन्दर्भ विवेचनं कुरुत ।** **( ५ )**

*(१) तस्य च पारिजात इव आश्रितनन्दनः हिमालय इव जनितशिवः, मन्दर इव भोगि भोगाङ्कितः कैलास इव महेश्वरोपभुक्तकोटिः मधुरिव नाना रामानन्दकरः ।*

*(२) आकर्षणमन्त्र सिद्धिमिव मनसः, चक्षुर्बन्धनमहौषधिमिव मन्मथेन्द्र जालिनः, त्रिभुवनविलोभन सृष्टिमिव प्रजापतेः, अष्टादशवर्षदेशीयां कन्याम पश्यत्स्वप्ने।*

**प्रश्नः ४** *वासवदत्तायाः कथायाः सारांश लिखन्तु।* **( १० )**

**( अथवा )**

*चिन्तामणिभूपस्य वर्णनं कुरुत।*

**तृतीयान्वितिः**

**प्रश्नः ५ एकस्य गद्यखण्डस्य ससन्दर्भ व्याख्या कार्या ।** **( ५ )**

*(१) अथ तस्य प्रियसखो मकरन्दो नाम कथमपि लब्ध प्रवेश दर्शनः* कन्दर्पसायक-प्रहारवंश कन्दर्पकेतुमुवाच ।

*(२) अपि पुनर्गृहीत सत्यथा भवन्ति। इत्यादि वदति तस्मिन्मकरन्दे प्रियसखे, कथमपि स्मरशरप्रहार परवशः कन्दर्प केतुः परिमिताक्षरमुवाच।*

**प्रश्नः ६** *कन्दर्पकेतुविरहवर्णनं साधुस्वभाववर्णनं च लिखत।* **( १० )**

**( अथवा )**

*रेवावर्णनं गङ्गावर्णनं च कुरुत।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः गद्यखण्डयोः एकस्य व्याख्याकर्तव्या । ( ५ )**

*(१) प्रशस्तकेदार इव बहुधान्य कार्य संवाद कः, पार्थ इव सुभद्रान्वितः सभीमसेनश्च, कृष्ण इव सत्यभामोपेतः सबलश्च श्रृङ्गारशेखरो नाम राजा प्रतिवसति।*

*(२) केचित्तिर्यग्गतय इव सुगन्धवाहाः केचित्कौरव सैनिका इव द्रोणाशासूचकाः, केचित्कैरवा करा इवा सोढ शूरभासः क्षणमेवं स्थिता राज पुत्राः । सा च क्षणैनैताने कैकशः समवलोक्य विरक्तहृदया सती तस्मात्कर्णीरथा दवततार।*

**प्रश्नः ८** *श्रृङ्गारशेखर वर्णनं कुरुत।* **( १० )**

**( अथवा )**

*नगरव्यवस्था वर्णनं वसन्त वर्णनं च लिखत।*

**प्रश्नः ७ अधोलिखितेषु दशप्रश्नानां उत्तराणि एकैक वाक्येन लिखत । ( १० )**

*(१) वासवदत्ता कथा वा आख्यायिका वर्तते ?*

*(२) वासवदत्ता कथायां नायकः कः ?*

*(३) कन्दर्प केतोः पितुः नाम किम् ?*

*(४) कन्दर्पकेतोः मित्रस्य नाम किम् ?*

*(५) कुसुमपुरस्य नृपः कः ?*

*(६) श्रृङ्गारखेररस्य पुत्र्याः नाम किम् ?*

*(७) वासवदत्तायाः मातुः नाम किम् ?*

*(८) वासवदत्ता केन लिखिता ?*

*(९) वासवदत्ता स्वप्ने किम् अपश्यत् ?*

*(१०) मङ्गलाचरणे कस्याः देव्याः स्तुतिः वर्तते ?*

*(११) मङ्गलाचरणे किं वृत्तम् ?*

*(१२) अस्यां कथायां कस्य पर्वतस्य वर्णनं अस्ति ?*

*(१३) सिंहः कस्योपरि आक्रमणं कृतवान् ?*

*(१४) काव्यस्य कति भेदाः ?*

*(१५) अस्यां कथायां मुख्य रसः कः ?*

--००--